No. ५६८४ · घ

Title श्रीलक्ष्मीसूकतम

Author +

Extent १४ Age +

Subject तन्त्रम · संपूर्णम

५६८४ - घ

लक्ष्मी स्तवं

नं० ~~१२२~~४

5684

F - I - 12

II - 2

Total - 14

complete.

नं० ५६८४-घ

श्री लक्ष्मी सूक्तम् (तन्त्रम्)

पत्राणि १४ (सम्पूर्णम्)

नं० ५६८४-घ

लक्ष्मी सूक्तम् (तन्त्रम्)

पत्राणि १४ (सम्पूर्णम्)



३७८

नं १२२८क
लक्ष्मी स्तोत्र
१२+२=१४ पत्राणि
तन्त्र।

श्रीगणेशायनमः॥ अस्य श्री वशीकरणवाराहीस्तोत्र मंत्र
स्य भार्गवऋषिः अनुष्टुप् छंदः श्रीमहालक्ष्मीर्देवता॥
श्रीं बीजं ह्रीं शक्तिः क्लीं कीलकं मम समस्तवश्यार्थे जपे
विनियोगः॥ ॐ भार्गवऋषये नमः शिरसि॥ ॐ अनुष्टुप्
छंदसे नमः मुखे ॐ महालक्ष्मीर्देव्यै नमः हृदये ॐ श्रीं-

= मम सम सकल न ष्टप्रा प्तेजप विनियोगः

श्रीसू. बीजायनमः गुह्ये ॐ ह्रींशक्तयेनमः पादयोः ॐ क्लींकी ॥१॥

लकायनमः सर्वांगे इति ऋष्यादिकरशुद्धिः ॥ ॐ श्रीं

अंगुष्ठा. ॐ ह्रींतर्ज. ॥ ॐ ऐंमध्यमा. ॥ ॐ श्रींअना.

ॐ ह्रींकनि. ॥ ॐ ऐंकरतल. ॥ एवंहृदयादिन्यासः ॥

ॐ भूर्भुवस्वरोमिति दिग्बंधः ॥ ॐ श्रीं ह्रीं ऐं लक्ष्मींक

मल धारिणीं ह्रीं हंसः स्वाहा ॥ ॐ श्रां श्रीं श्रूं श्रैं श्रौं
श्रः श्रीं ह्रीं क्लीं ऐं सौः हंसः स्वाहा ॥ हरिः ॐ आच
म्य प्राणानायम्य ॥ देशकालौ स्मृत्वा ॥ श्रुतिस्मृतिपुरा
णोक्तफलप्राप्त्यर्थं अलक्ष्मी परिहारार्थं सिद्धलक्ष्मी
प्राप्त्यर्थं श्री महालक्ष्मी देवता प्रीत्यर्थं अमुकसंख्या

श्रीसू.

श्रीसूक्तजपमहं करिष्ये ॥ तदंगत्वेन आसनविधिपूर्वकं ॥२॥

शरीरशुध्यर्थे न्यासांश्च करिष्ये ॥ भूशुध्यादि कृत्वा ॥ अस्य

श्रीसूक्तस्य कर्दमानंद चिक्लीतेंदिरा ऋषयः श्रीरग्निर्दे

वता आद्यास्तिस्त्रोनुष्टुभः स्तत एका प्रस्तारपंक्तिः स्त-

तोद्वे त्रिष्टुभौ स्ततोष्टाव मुष्टुभों त्या प्रस्तारपंक्तिः हलौ

बीजानी॥ स्वराःशालवः॥ बिंदवः॥ कीलकं न्यासे विनि

योगः कर्दमानंद चिक्लीतेंदिरा सुता ऋषयः शिरसी॥

ॐ अनुष्टुप् प्रस्तार पंक्ति त्रिष्टुभ नुष्टुप् प्रस्तार पंक्ति-

छंदेभ्यो नमः मुखे॥ ॐ श्रीर्देवतायैनमः हृदये ॐ हः

क्लौ बीजानी गुह्ये॥ ॐ स्वराः शालवः पादयोः॥ ॐ हि

श्री सू: रण्यवर्णां अंगुष्टा॰ ॥ ॐ हरिणीं तर्जनी॰ ॥ ॐ सुवर्णरज ॥२॥

तस्रजां मध्य॰ ॥ ॐ चंद्रां हिरण्मयीं अना॰ ॥ ॐ लक्ष्मीं 3

कनिष्टि॰ ॥ ॐ जातवेदो ममावह करतल कर पृष्टा॰ ॥

ॐ हिरण्यवर्णां हृदया॰ ॥ ॐ हरणीं शिरसे॰ ॥ ॐ सुवर्ण

रजतस्रजां शिखा॰ ॥ ॐ चंद्रां हिरण्मयीं कवचा॰ ॥ ॐ लक्ष्मीं ने॰

त्रत्रया॰॥ ॐ जातवेदोममावह अस्त्रायफट्॥ हिरण्यवर्णायै
नमः अंगुष्ठा॰॥ चंद्रां हिरण्मयीं लक्ष्मीं जातवेदोममावह तर्जनी॰॥
रजतस्त्रजायैनमः मध्य॰॥ हिरण्यवर्णायैनमः अनामि॰॥ हिर
ण्याक्षायैनमः कनि॰॥ हिरण्यायैनमः करतलकरपृष्ठा॰॥ एवं
हृदयादि॰॥ ॐ हिरण्यवर्णांहरिणीं (सु) शिरसि॥ ॐ तामवाहंने

श्रीसू. त्रयोः॥ ॐ अश्वपूर्वां. तां भ्रुवोः॥ ॐ कांसोस्मितां. यं नासिक ॥४॥

योः॥ ॐ चंद्रां प्रभासां. णे मुखे॥ ॐ आदित्यवर्णे. क्ष्मीः कं ५

ठे॥ ॐ उपैतु मां देव तु मे बाह्वोः॥ ॐ क्षुत्पिपासा. हात हृदये

ॐ गंधद्वारां. यं नाभौः॥ मनसः काम. यशः गुह्ये॥ ॐ कर्दमे

न. नीं गुदे॥ ॐ आपस्रजं. कुले. ऊर्वोः॥ ॐ आर्द्रां यः वहस्तं

जंघयोः॥ तां मन्त्रआवह. हं पादयोः॥ अथ ध्यानम्॥ अरुणकमल
संस्थां तद्रजःपुंजवर्णां करकमलधृतेष्टां भीतियुग्मांबुजाच
मणिमुकुटविचित्रालंकृता पद्मजालै र्भवतु भुवनमाता संततं
श्रीश्रीयैच ॥१॥ ध्यायेत्पद्मासनस्थां विकसितवदनां पद्मप
त्रायक्षीं हेमाभां पीतवस्त्रां करकलितलसद्धेमपद्मं चरा-

ता

गां नानालंकारभूषां सततमभयदां भक्तिनम्रां भवानीं ॥५॥ 5

श्रीं विद्यां शांतमूर्तिं सकलसुरसुतां सर्वसंपत्प्रदात्रीम्

॥इतिध्यात्वामानसोपचारैः संपूज्य ॥ दशसहस्त्रजपि

त्वासिद्धिंप्राप्नुयात् ॥ ॐ हिरण्यवर्णामितिपंचदशर्च

स्यसूक्तस्य ॥ आनंदः कर्दमाचिक्लीतेंदिरासुताऋष

यः ॥ श्रीर्देवता ॥ अनुष्टुप्छंदः ॥ ऐंबीजं ॥ सौःशक्तिः
क्लींकीलकम् ॥ ममसकलदारिद्र्यपरिहारार्थं ॥ ऐश्व
र्यप्राप्त्यर्थंश्रीसूक्तजपेविनियोगः ॥ ऋषयेनमःशि
रसि ॥ छंदसेनमःमुखे ॥ देवतायैनमःहृदये ॥ बीजा
यैनमःदक्षिणस्तने ॥ शक्तयेनमःवामस्तने ॥ कील

कायैनमःनाभौ ॥ ऐंअंगु० ॥ ह्रींतर्ज० ॥ श्रींमध्य० ॥ 
ऐंआनामि० ॥ ह्रींकनिष्टि० ॥ श्रींकरतल० ॥ एवंहृद० ॥
॥ध्यानम् ॥ यामातामधुकैटभप्रमथिनीयामाहि
षोन्मूलिनीयाधूम्रेक्षणचंडमुंडमथिनीयारक्तबीजा
शिनी । शक्तिःशुंभनिशुंभदर्पदलिनीयासिद्धल-

क्ष्मीःपरासाचंडीनवकोटिशक्तिसहितामांपातुवि-
श्वेश्वरीम् ॥इतिध्यात्वामानसोपचारैःसंपूज्य ॥
लंपृथिव्यात्मकंगंधंसमर्प० ॥ हंआकाशात्मकं
पुष्पंसम० ॥ यंवायव्यात्मकंधूपंसम० ॥ रंआग्न्या
त्मकंदीपंसम० ॥ वंअमृतात्मकंअमृतनैवेद्यंस

॥संसर्वात्मकंसर्वोपचारंसम०॥ छत्रंचामरं-

व्यजनंपं०॥ श्रीसूक्तंसबीजंजपेत् ॥ॐ ऐंहिर

ण्यवर्णांहिरिणींसुवर्णरजतस्रजां । चन्द्रांहिर

ण्मयींलक्ष्मींजातवेदोममावह ऐं ॥१॥ ॐ ह्रीं

तामआवहजातवेदोलक्ष्मीमनपगामिनीम्

यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहंह्रीं ॥२॥ॐ
श्रींअश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीं । श्री
यंदेवीमुपह्वयेश्रीर्मादेवीर्जुषतांश्रीं ॥३॥ॐक्लीं
कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तां
तर्पयतीं । पद्मेस्थितांपद्मवर्णांतामिहोपह्वये

 

श्रीयंक्लीं ॥ ४ ॥ ॐ वरदचन्द्रांप्रभासांयशसाज्

वलंतींश्रियंलोकेदेवजुष्टामुदारां । तांपद्मनेमीं

 शरणंप्रपद्येअलक्ष्मीर्मेनश्यतांत्वांवृणोमिवरद॥५

ॐ वाग्वादिनिआदित्यवर्णेतपसोधिजातोवनस्प

तिस्तववृक्षोथबिल्वः । तस्यफलानितपसानुदं-

तुमायांतरायाश्च बाह्याअलक्ष्मीःवाग्वादिनि ॥६

ॐ ऐंउपैतुमांदेवसखःकीर्तिश्चमणिनासह। प्रादु

र्भूतौसुराष्ट्रेस्मिन्किर्त्तिंवृद्धिंददातुमेऐं ॥७॥ ॐ

सौःक्षुत्पिपासामलांज्येष्टाऽलक्ष्मीनार्शयाम्यहं। अ

अभूतिमसमृद्धिंचसर्वानिर्णुदमेगृहात्सौः ॥८

श्रीसू ॐहंसःगधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं। ॥१॥

ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रीयंहंसः॥९ १

ॐआंमनसःकाममाकूतिंवाचःसत्यमशीमहि

पशूनांरूपमन्यस्यमयीश्रीश्रयतांयशः॥१०॥ आं

ॐह्रींकर्दमेनप्रजाभूतामयिसंभ्रमकर्दमाश्रियं

वासयमेकुलेमातरंपद्ममालिनींह्रीं ॥११॥ ॐक्रों
आपःसृजंतुस्निग्धानिचिक्लीतवसमेगृहे । नीचदे
वींमातरंश्रियंवासयमेकुलेक्रौं ॥१२॥ ॐक्रींआर्द्रां
पुष्करिणींपुष्टींसुवर्णांहिममालिनीं । सूर्यांहिर-
ण्मयींलक्ष्मींजातवेदोममावहक्रीं ॥१३॥ ॐस्त्रीं

श्रीसू

आर्द्रांयःकरिणींयष्टींपिंगलांपद्ममालिनीं।चंद्रां ॥१०॥

हिरण्मयींलक्ष्मींजातवेदोममावहस्त्री ॥१४॥

॥ॐहुंतांमआवहजातवेदोलक्ष्मीमलपगामिनीं।

यस्यांहिरण्यंप्रभूतिंगावोदास्योऽश्वांन्विदेयंपुरुषा

नहंहुं॥१५॥ॐस्वाहायःशुचिप्रयतोभूत्वाजुहु

यादाज्यमन्वहं। श्रियःपंचदशर्चंचश्रीकामःस
ततंजपेत्स्वाहा॥१६॥ पद्मानने पद्मऊरूपद्मा
क्षीपद्मसंभवे। तन्मेभजासिपद्माक्षीयेनसौख्यं
लभाम्यहम्॥ अश्वदायीगोदायीधनदायीमहा
धनेधनंमेजुषतांदेवीसर्वकामांश्चदेहिमे। पुत्रपौ

॥११॥

त्रधनंधान्यंहस्त्यश्वादिगवेरथंप्रजानांभजसिमा ॥

ताआयुष्मतंकरोतुमे ॥ धनमग्निर्धनंवायुर्धनं-

सूर्येधिनंवसुः। धनमिंद्रोबृहस्पतिर्वरुणंधनमु

त्सृजेत् ॥ वैनतेयसोमंपिबसोमंपिबतुवृत्रहा।

सोमंधनस्यसोमिनोमह्यंददातुमिनः॥ नक्रोधो

नचमात्सर्यंनलोभोनाशुभामतिः। भवंतिकृत
पुण्यानांभक्तानांश्रीसूक्तंजपेत् ॥ श्रीवर्चस्वमायु
ष्यमारोग्यमाविधात्पवमानंमहीयते। धान्यधनं
पशुंबहुपुत्रलाभंशतसंवत्सरंदीर्घमायुः॥ पद्मान
नेपद्मनिपद्मपत्रेपद्मप्रियेपद्मदलायताक्षी। विश्व

प्रियेविश्वमनोनुकूलेत्वत्पादपद्मंहृदिसन्निधत्स्वम् ॥ आनंदकर्दमश्चैवचिक्लीतइवविश्रिताः ऋषयःश्रीपुत्रांश्चस्वयंश्रीर्देविदेवता ॥ श्रीलक्ष्मीसूक्तंसमाप्तम् ॥ ॐ ॥ शुभम् ॥

श्रीगणेशायनमः श्रीसांबसदाशिवायनमः ॥ अथवश्यवाराहकल्पो

क्तस्वामीवश्य सकल शत्रु क्षय स्तोत्र विधिः अद्यपूर्वोच्चारितए

वंगुणविशेषण विशिष्टायांशुभपुण्यतिथौममस्वामीश्रीयाभिवि

वृध्यर्थं सकल शत्रू पिशाचवत्पलायनार्थे जपेविनियोगः ॥अस्य

श्रीस्वामीवश्यकरीशत्रूविध्वंसिनीस्तोत्रमंत्रस्यपिंगलऋषिः॥

व॰ वा॰

श्रीरामचंद्रवरदायिनी वाराही देवता अनुष्टुप्छंदः ॥ ममस्वामि प्रीत्य १

भिवृध्यर्थं सकलशत्रुवश्यार्थे जपमहं करिष्ये ॥ गुरुं ध्यात्वा ॥ मुल

मंत्रः ॥ ऐं रं रूं चामुंडे कुरुकुरु मे वशमानय हुं फट् स्वाहा ॥ यथाश

क्ति मूलमंत्रं जपित्वा स्तोत्रं जपेत् ॥ बिभिषण उवाच ॥ स्वामिव

श्यकरी देवी प्रीती वृद्धीकरी मम ॥ शत्रुविध्वंसिनी रौद्री त्रि-

शिरासाग्निलोचना ।। आग्निज्वालारौद्रमुखीघोरदंष्ट्रा त्रिशू

लिनी ।। दिगंबरामुक्तकेशीरक्तपाणिर्महोदरा ।। एकराष्ट्र

द्विष्कृते घोरे शत्रुमुद्दिश्यते विषं ।। स्वामिमुद्दिश्यामृतंमेप्रसादा

द्रुस्तुतेसदाइमंस्तवंजपेन्नित्यंविजयंशत्रुनाशनं ।। स्वामिनि-

त्यभीवृध्यर्थंजपेत्येस्यनसंशयः ।। सहस्रत्रिशतंकृत्वाकार्य

सिद्धिर्भविष्यती ॥ जपा[illegible]शांशतोहोमः सर्षपैस्तंदुलै घृतैः ॥ पंच

खाद्य घृतैर्हुत्वास्वामिवश्यकरीभवेत् ॥ ब्राह्मणान् भोजयेत-

पश्चात्स्वाभीष्टफलप्रदं ॥ इतीश्रीवाराहकल्पे सांबसदाशी

वसंवादे स्वामिवश्यकरी शत्रुविध्वंसिनी वाराहीस्तोत्रं सं

पूर्ण ॥ ६ ॥ सांबसदाशिवार्पणमस्तु ॥ ६ ॥ ६ ॥ शुभं ॥

१२६